श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

बलिराजेन्द्रेणोक्तं

# ॥ श्रीहरिनाममालास्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीहरिनाममालास्तोत्रम् ॥

गोविन्दं गोकुलानन्दं गोपालं गोपिवल्लभम्।
गोवर्धनोद्धरं धीरं तं वन्दे गोमतीप्रियम्॥ १ ॥

नारायणं निराकारं नरवीरं नरोत्तमम्।
नृसिंहं नागनाथं च तं वन्दे नरकान्तकम्॥ २ ॥

पीताम्बरं पद्मनाभं पद्माक्षं पुरुषोत्तमम्।
पवित्रं परमानन्दं तं वन्दे परमेश्वरम्॥ ३ ॥

राघवं रामचन्द्रं च रावणारिं रमापतिम्।
राजीवलोचनं रामं तं वन्दे रघुनन्दनम्॥ ४ ॥

वामनं विश्वरूपं च वासुदेवं च विठ्ठलम्।
विश्वेश्वरं विभुं व्यासं तं वन्दे वेदवल्लभम्॥ ५ ॥

दामोदरं दिव्यसिंहं दयालुं दीननायकम्।
दैत्यारिं देवदेवेशं तं वन्दे देवकीसुतम्॥ ६ ॥

मुरारिं माधवं मत्स्यं मुकुन्दं मुष्टिमर्दनम्।
मुञ्जकेशं महाबाहुं तं वन्दे मधुसूदनम्॥ ७ ॥

केशवं कमलाकान्तं कामेशं कौस्तुभप्रियम्।
कौमोदकीधरं कृष्णं तं वन्दे कौरवान्तकम्॥ ८ ॥

भूधरं भुवनानन्दं भूतेशं भूतनायकम्।
भावनैकं भुजङ्गेशं तं वन्दे भवनाशनम्॥ ९ ॥

जनार्दनं जगन्नाथं जगज्जाड्यविनाशकम्।
जामदग्न्यं वरं ज्योतिस्तं वन्दे जलशायिनम्॥ १० ॥

चतुर्भुजं चिदानन्दं चाणूरमल्लमर्दनम्।
चराचरगतं देवं तं वन्दे चक्रपाणिनम्॥ ११ ॥

श्रियःकरं श्रियोनाथं श्रीधरं श्रीवरप्रदम्।
श्रीवत्सलधरं सौम्यं तं वन्दे श्रीसुरेश्वरम्॥ १२ ॥

योगीश्वरं यज्ञपतिं यशोदानन्ददायकम्।
यमुनाजलकल्लोलं तं वन्दे यदुनायकम्॥ १३ ॥

शालग्रामशिलशुद्धं शङ्खचक्रोपशोभितम्।
सुरासुरैस्सदा सेव्यं तं वन्दे साधुवल्लभम्॥ १४ ॥

त्रिविक्रमं तपोमूर्तिं त्रिविधाघौघनाशनम्।
त्रिस्थलं तीर्थराजेन्द्रं तं वन्दे तुलसीप्रियम्॥ १५ ॥

अनन्तमादिपुरुषमच्युतं च वरप्रदम्।
आनन्दं च सदानन्दं तं वन्दे चाघनाशनम्॥ १६ ॥

लीलया धृतभूभारं लोकसत्त्वैकवन्दितम्।
लोकेश्वरं च श्रीकान्तं तं वन्दे लक्ष्मणप्रियम्॥ १७ ॥

हरिं च हरिणाक्षं च हरिनाथं हरिप्रियम्।
हलायुधसहायं च तं वन्दे हनुमत्पतिम्॥ १८ ॥

हरिनामकृतामाला पवित्रा पापनाशिनी।
बलिराजेन्द्रेण चोक्ता कण्ठे धार्या प्रयत्नतः॥ १९ ॥

॥ इति श्रीहरिनाममालास्तोत्रं संपूर्णम्॥